This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

| Roll No. अनुक्रमाङ्कः | | | | | | | | | | | | | Code No. 58/S/A गूढसंख्या |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|

Set स्तबकः **A**

# VEDA ADHYAYAN
## वेदाध्ययनम्
## (245)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of two Invigilators** 1. ____________________
**(निरीक्षकयोः हस्ताक्षरम्)**
2. ____________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।
7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# VEDA ADHYAYAN

## वेदाध्ययनम्

## (245)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः (Full Marks) : 100

निर्देशाः :

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10** **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) मन्त्रब्राह्मणात्मकः शब्दराशिर्वेदः इति कस्य मतम् ?

(क) आपस्तम्बस्य (ख) जैमिनेः

(ग) सायणाचार्यस्य (घ) मनोः

(2) हलायुधः शुक्लयजुर्वेदस्य कस्याः संहितायाः भाष्यं लिखितवान् ?

(क) माध्यन्दिनस्य (ख) काण्वस्य

(ग) ऐतरेयस्य (घ) गोपथस्य

(3) ऊर्वशी–पुरुरवसोः संवादे ऊर्वश्याः कति पणाः आसन् ?

(क) पञ्च (ख) त्रयः

(ग) एकः (घ) चत्वारः

(4) सोमयागे प्रधाना आहुतिः कस्य विधीयते ?

(क) पुरोडाशस्य (ख) पशोः वपायाः

(ग) आमिक्षायाः (घ) सोमरसस्य

(5) वेदस्य पर्यायशब्दः –

(क) तन्त्रम् (ख) आगमः

(ग) संहिता (घ) दर्शनम्

(6) गायत्रीच्छन्दसि साकल्येन कति अक्षराणि विद्यन्ते ?

(क) 24 (ख) 30

(ग) 34 (घ) 16

(7) शुनःशेपोपाख्याने हरिश्चन्द्रस्य पुत्रस्य नाम किम् ?

(क) पूर्णचन्द्रः (ख) रोहितः

(ग) पुरूरवाः (घ) शुनःशेपः

(8) दिवसे विद्यमानस्य सूर्यस्य नाम किम् ?

(क) मार्तण्डः (ख) वरुणः

(ग) सविता (घ) मित्रः

(9) शयते इत्यस्य लौकिकं रूपं किम् ?

(क) शयति (ख) शयितः

(ग) शेते (घ) शेरते

(10) तेजस्विन् इत्यत्र मत्वर्थे विनिप्रत्ययः केन सूत्रेण ?

(क) अस्मायामेधास्रजो विनिः (ख) बहुलं छन्दसि

(ग) छन्दसि परेऽपि (घ) छन्दसि च

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) ऋग्वेदस्य उपनिषदां नाम लिखत । 1+1

(2) महीधरः कुत्र जन्म अलभत ? सः कस्य वेदस्य भाष्यं कृतवान् ? 1+1

(3) वैदिकच्छन्दांसि कति ? सर्वाधिकानि अक्षराणि कस्मिन् छन्दसि वर्तन्ते ? 1+1

(4) नैयायिकाः वेदस्य पौरुषेयत्वम् अनित्यत्वं च किमर्थं स्वीकुर्वन्ति ? 1+1

(5) संज्ञानसूक्तस्य कः ऋषिः, किं छन्दः, का च देवता ? 1+1

(6) पूषदेवतायाः अपरं नाम किम् ? कथं तस्य पूषा इति नाम ? 1+1

(7) छन्दसि निष्टयक्र्यदेवहूय – इति सूत्रं सम्पूर्णं लिखत । सूत्रस्यैकम् उदाहरणं लिखत । 1+1

(8) सोमम‌र्हति यः इति सूत्रेण कः प्रत्ययो विधीयते ? किं चात्र उदाहरणम् ? 1+1

(9) ओजस्यम् इति पदस्य कोर्थः ? किं चात्र यत्प्रत्ययविधायकं सूत्रम् ? 1+1

(10) लुङ्–लङ्–लृङ्क्षु परेषु धातोः आडागमविधायकं सूत्रं किम् ? उदाहरणमेकं प्रददत । 1+1

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) वेदाः पौरुषेया अपौरुषेया वा ? वेदस्य अपौरुषेयत्वे पौरुषेयत्वे च काः युक्तयः सन्ति ?

(2) वेदस्य कालविषये बालगङ्गाधरतिलकस्य मतं संक्षेपेण आलोचयत ।

(3) समानो मन्त्रः समितिः समानी – इति मन्त्रं सम्पूर्णं लिखित्वा तस्यार्थं लिखत ।

(4) सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् । हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः ॥ – इति मन्त्रं व्याख्यात ।

(5) यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि । यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः ॥ – इति मन्त्रं सप्रसङ्गं विवृणुत ।

(6) कलिः शयानो भवति संजिहानस्तु द्वापरः । उत्तिष्ठंस्त्रेता भवति कृतं सपद्यते चरंश्चरैवेति । – इति मन्त्रं सप्रसङ्गं संक्षेपेण व्याख्यात ।

(7) प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने । गावेव शुभ्रे मारता रिहाणे विपाट्छुतुद्री पयसा जवेते ॥ – इति मन्त्रं सप्रसङ्गं व्याख्यात ।

(8) देवेभिः इति रूपं साधयत ।

(9) लेटोऽडाटौ इति सूत्रं सोदाहरणं व्याख्यात ।

(10) विभाषा पृष्टप्रतिवचने हेः इति सूत्रस्यार्थं लिखत । सूत्रस्योदाहरणं प्रदाय उदाहरणे सूत्रार्थसमन्वयं च कुरुत ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) वेदस्य पाठप्रकारान उल्लिख्य यथेच्छं द्वयं व्याख्यात ।

(2) सूर्यस्वरूपं यथाधीतम् आलोचयत ।

(3) नक्षत्राद्धः इति सूत्रं सोदाहरणं व्याख्यात ।

(4) आज्जसेरसुक् इति सूत्रं सोदाहरणं व्याख्यात ।

(5) नित्यं छन्दसि इति सूत्रस्य उदाहरणं किम् ? वैयाकरणदिशा तस्य रूपं साधयत ।

---